শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী পরকালযতি কৃতঃ

# ॥ আচার্যাৱতারঘট্টার্থঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ আচার্যাৱতারঘট্টার্থঃ ॥

ব্রহ্মতন্ত্রস্বতন্ত্রেণ পরকালযতীন্দুনা।
আচার্যাৱতারঘট্টার্থস্সঙ্গ্রহেণ প্রকাশ্যতে॥ 1 ॥

শ্রীমদ্বেদান্তসূক্ষ্মার্থনিশ্চযায চলাত্মনাম্।
শ্রীমানাদ্যো গুরুঃ পঞ্চলক্ষগ্রন্থানুপাদিশৎ॥ 2 ॥

চতুরশ্চতুরো গ্রন্থান্ শ্রীশঠারিস্ততো ৱ্যধাৎ।
ততঃ শ্রীনাথযোগীন্দ্রো গ্রন্থদ্বযমুদাহরৎ॥ 3 ॥

পুনঃ শ্রীযামুনাচার্যো গ্রন্থানষ্টাৱুদাহরৎ।
শ্রীরামানুজযোগীন্দ্রস্ততো গ্রন্থান্নৱ ৱ্যধাৎ॥ 4 ॥

তৎসিদ্ধান্তসমৃদ্ধ্যর্থং তদ্বিরোধিক্ষযায চ।
স্বপ্নে শ্রীশপ্রেরিত শ্রীরামানুজনিদেশতঃ॥ 5 ॥

সংস্কৃতপ্রাকৃতাগস্ত্যভাষাস্তোত্রসুভাষিতান্।
ৱিংশত্যধিশতগ্রন্থাংশ্চক্রে ৱেদান্তদেশিকঃ॥ 6 ॥

প্রকৃতানুগুণান্ গ্রন্থান্ সুবহৌংশ্চ তদা তদা।
ৱিতেনে নিগমান্তার্যস্তেষাং সঙ্খ্যা ন ৱিদ্যতে॥ 7 ॥

ন চৈৱাদ্যগুরুপ্রোক্তগ্রন্থৱদ্বহু ৱিস্তরাঃ।
ন চার্ৱাচীনরচিতগ্রন্থৱল্লঘৱোঽপি চ॥ 8 ॥

অন্যূনাধিকসংপত্তিযুক্তা ৱেদান্তসারদাঃ।
একৈকস্মিন্নপি গ্রন্থে ৎৱেকপ্রকরণেঽপি চ॥ 9 ॥

স্ৱরূপোপাযপরমপুরুষার্থপ্রকাশকাঃ।
গ্রন্থাঃ শ্রীনিগমান্তার্যরচিতা বহুসম্মতাঃ॥ **10**॥

নিগমান্তগুরুপ্রোক্তং গ্রন্থং কঞ্চিৎ পঠন্তি যে।
ৱিমতস্থান্ সমস্তাংশ্চ তে জযন্তি ন সংশযঃ॥ **11**॥

অত এৱ পুরা শ্রীমদ্রঙ্গনাথেন চ শ্রিযা।
সন্তুষ্ট্যাশাসিতং তস্মিন্নুৎসৱে ফাল্গুনোত্তরে॥ **12**॥

ৱেদান্তাচার্যরচিতপ্রবন্ধাস্সারদর্শিনঃ।
পর্যাপ্তমাৱযোশ্শ্রোত্রোঃ কিং ৱা গ্রন্থান্তরাযুতৈঃ॥ **13**॥

ইত আকল্পমালীলমনিন্দ্যং মামকং মতম্।
অৱ্যাহতং ভৱেদেতদত্র মে নাস্তি সংশযঃ॥ **14**॥

তস্মাৎপশ্চাত্তনগ্রন্থো মাস্তু মাস্তু মহীতলে।
মা চাস্মৎসন্নিধৌ তেষামর্চা সম্মানমিত্যপি॥ **15**॥

এতত্ত্রৈলোক্যনির্মাণত্রাণসংহারকারণম্।
আৱযোরপরাভূতং শাসনং শাশ্ৱতং পরম্॥ **16**॥

এৱং মযা শ্রিযা চৈৱ সত্যং শপ্তাঃ স্থ সজ্জনাঃ।
অন্যথাচরতঃ পুংসঃ ক্ষিপাম্যেৱাচিরাদিতি॥ **17**॥

রম্যজামাতৃযোগীন্দ্রস্তৎপরীক্ষ্য চ শাসনম্।
মাস্ত্ৱেৱ মামকার্চাদীত্যন্ৱশাৎ স্ৱপদাশ্রিতান্॥ **18**॥

যথার্থানেৱমাদ্যর্থান্ দর্শযন্তী স্ফুটং ততঃ।
সদ্ভিরেষা পরিগ্রাহ্যা সংপ্রদাযপ্রকাশিকা॥ **19**॥

সন্তশ্শুদ্ধান্তসিদ্ধান্তাস্সন্তুষ্টাস্সন্তু সন্ততম্।
অসন্তোঽতঃ পলাযন্তু নিন্দন্তশ্শান্তসন্ততিম্॥ **20**॥

পরকালমুনেঃ প্রণতিং কলযে চিরকালকৃতৈস্সুকৃতৈরমিতৈঃ।
নরকাপনযো যদধীনতরো নরকারিরযং যদুপান্তচরঃ॥ **21** ॥

॥ ইতি আচার্যাৱতারঘট্টার্থঃ সমাপ্তঃ ॥